# শ্রীসুব্রহ্মণ্যসহস্রনামস্তোত্রম্ মার্কণ্ডেযপ্রোক্তম্

{॥ শ্রীসুব্রহ্মণ্যসহস্রনামস্তোত্রম্ মার্কণ্ডেযপ্রোক্তম্ ॥}

ওঁ শ্রী গণেশায নমঃ ।

অস্য শ্রী সুব্রহ্মণ্য সহস্রনামস্তোত্রমহামন্ত্রস্য, মার্কণ্ডেয ঋষিঃ ।

অনুষ্টুপ্ছন্দঃ । শ্রী সুব্রহ্মণ্যো দেবতা । শরজন্মাঽক্ষয ইতি বীজং,

শক্তিধরোঽক্ষয ইতি শক্তিঃ । কার্তিকেয ইতি কীলকম্ ।

ক্রৌঞ্চভেদীত্যর্গলম্ । শিখিবাহন ইতি কবচম্, ষণ্মুখ ইতি ধ্যানম্ ।

শ্রী সুব্রহ্মণ্য প্রসাদ সিদ্ধ্যর্থে নাম পারাযণে বিনিযোগঃ ।

করন্যাসঃ

ওঁ শং ওঙ্কারস্বরূপায ওজোধরায ওজস্বিনে সুহৃদ্যায

হৃষ্টচিত্তাত্মনে ভাস্বদ্রূপায অঙ্গুষ্ঠাভ্যাং নমঃ । var ভাস্বরূপায

ওঁ রং ষট্কোণ মধ্যনিলযায ষট্কিরীটধরায শ্রীমতে ষডাধারায

ষডাননায ললাটষণ্নেত্রায অভযবরদহস্তায তর্জনীভ্যাং নমঃ ।

ওঁ বং ষণ্মুখায শরজন্মনে শুভলক্ষণায শিখিবাহনায

ষডক্ষরায স্বামিনাথায মধ্যমাভ্যাং নমঃ ।

ওঁ ণং কৃশানুসম্ভবায কবচিনে কুক্কুটধ্বজায

শূরমর্দনায কুমারায সুব্রহ্মণ্যায (সুব্রহ্মণ্য) অনামিকাভ্যাং নমঃ ।

ওঁ ভং কন্দর্পকোটিদিব্যবিগ্রহায দ্বিষড্বাহবে দ্বাদশাক্ষায

মূলপ্রকৃতিরহিতায কনিষ্ঠিকাভ্যাং নমঃ ।

ওঁ বং সচ্চিদানন্দস্বরূপায সর্বরূপাত্মনে খেটধরায খড্গিনে

শক্তিহস্তায ব্রহ্মৈকরূপিণে করতলকরপৃষ্ঠাভ্যাং নমঃ ॥

এবং হৃদযাদিন্যাসঃ । ওঁ ভূর্ভুবস্সুবরোমিতি দিগ্বন্ধঃ ।

ধ্যানম্ -

ধ্যাযেৎষণ্মুখমিন্দুকোটিসদৃশং রত্নপ্রভাশোভিতং var বন্দে ষণ্মুখ

বালার্কদ্যুতি ষট্কিরীটবিলসৎকেযূর হারান্বিতম্ ।

কর্ণালম্বিত কুণ্ডল প্রবিলসদ্গণ্ডস্থলৈঃ শোভিতং ?? was missing la?

কাঞ্চী কঙ্কণকিঙ্কিণীরবযুতং শৃঙ্গারসারোদযম্ ॥

ষড্বক্ত্রং শিখিবাহনং ত্রিনযনং চিত্রাম্বরালঙ্কৃতং

বজ্রং শক্তিমসিং ত্রিশূলমভযং খেটং ধনুশ্চক্রকম্ ।

পাশং কুক্কুটমঙ্কুশং চ বরদং দোর্ভির্দধানং সদা ?de?

ধ্যাযামীপ্সিত সিদ্ধিদং শিবসুতং স্কন্দং সুরারাধিতম্ ॥

দ্বিষড্ভুজং ষণ্মুখমম্বিকাসুতং কুমারমাদিত্য সহস্রতেজসম্ ।

বন্দে মযূরাসনমগ্নিসম্ভবং সেনান্যমধ্যাহমভীষ্টসিদ্ধযে ॥

লমিত্যাদি পঞ্চপূজা ।

অথ স্তোত্রম্ ।

ওঁ সুব্রহ্মণ্যঃ সুরেশানঃ সুরারিকুলনাশনঃ ।

ব্রহ্মণ্যো ব্রহ্মবিদ্ ব্রহ্মা ব্রহ্মবিদ্যাগুরূর্গুরুঃ ॥ ১॥

ঈশানগুরুরব্যক্তো ব্যক্তরূপঃ সনাতনঃ ।

প্রধানপুরুষঃ কর্তা কর্ম কার্যং চ কারণম্ ॥ ২॥

অধিষ্ঠানং চ বিজ্ঞানং ভোক্তা ভোগশ্চ কেবলঃ ।

অনাদিনিধনঃ সাক্ষী নিযন্তা নিযমো যমঃ ॥ ৩॥

বাক্পতির্বাক্প্রদো বাগ্মী বাচ্যো বাগ্বাচকস্তথা ।

পিতামহগুরুর্লোকগুরুস্তত্ত্বার্থবোধকঃ ॥ ৪ ॥

প্রণবার্থোপদেষ্টা চাপ্যজো ব্রহ্ম সনাতনঃ ।

বেদান্তবেদ্যো বেদাত্মা বেদাদির্বেদবোধকঃ ॥ ৫ ॥

বেদান্তো বেদগুহ্যশ্চ বেদশাস্ত্রার্থবোধকঃ ।

সর্ববিদ্যাত্মকঃ শান্তশ্চতুষ্ষষ্টিকলাগুরুঃ ॥ ৬॥

মন্ত্রার্থো মন্ত্রমূর্তিশ্চ মন্ত্রতন্ত্রপ্রবর্তকঃ ।

মন্ত্রী মন্ত্রো মন্ত্রবীজং মহামন্ত্রোপদেশকঃ ॥ ৭॥

মহোৎসাহো মহাশক্তির্মহাশক্তিধরঃ প্রভুঃ ।

জগৎস্রষ্টা জগদ্ভর্তা জগন্মূর্তির্জগন্মযঃ ॥ ৮॥

জগদাদিরনাদিশ্চ জগদ্বীজং জগদ্গুরুঃ ।

জ্যোতির্মযঃ প্রশান্তাত্মা সচ্চিদানন্দবিগ্রহঃ ॥ ৯॥

সুখমূর্তিঃ সুখকরঃ সুখী সুখকরাকৃতিঃ ।

জ্ঞাতা জ্ঞেযো জ্ঞানরূপো জ্ঞপ্তির্জ্ঞানবলং বুধঃ ॥ ১০॥

বিষ্ণুর্জিষ্ণুর্গ্রসিষ্ণুশ্চ প্রভবিষ্ণুঃ সহিষ্ণুকঃ ।

বর্ধিষ্ণুর্ভূষ্ণুরজরস্তিতিক্ষুঃ ক্ষান্তিরার্জবম্ ॥ ১১॥

ঋজুঃ সুগম্যঃসুলভো দুর্লভো লাভ ঈপ্সিতঃ ।

বিজ্ঞো বিজ্ঞানভোক্তা চ শিবজ্ঞানপ্রদাযকঃ ॥ ১২॥

মহদাদিরহঙ্কারো ভূতাদির্ভূতভাবনঃ ।

ভূতভব্য ভবিষ্যচ্চ ভূত ভব্যভবৎপ্রভুঃ ॥ ১৩॥

দেবসেনাপতির্নেতা কুমারো দেবনাযকঃ ।

তারকারির্মহাবীর্যঃ সিংহবক্ত্রশিরোহরঃ ॥ ১৪॥

অনেককোটিব্রহ্মাণ্ড পরিপূর্ণাসুরান্তকঃ ।

সুরানন্দকরঃ শ্রীমানসুরাদিভযঙ্করঃ ॥ ১৫॥

অসুরান্তঃ পুরাক্রন্দকরভেরীনিনাদনঃ ।

সুরবন্দ্যো জনানন্দকরশিঞ্জন্মণিধ্বনিঃ ॥ ১৬॥

স্ফুটাট্টহাসসঙ্ক্ষুভ্যত্তারকাসুরমানসঃ ।

মহাক্রোধো মহোৎসাহো মহাবলপরাক্রমঃ ॥ ১৭॥

মহাবুদ্ধির্মহাবাহুর্মহামাযো মহাধৃতিঃ।

রণভীমঃ শত্রুহরো ধীরোদাত্তগুণোত্তরঃ ॥ ১৮॥

মহাধনুর্মহাবাণো মহাদেবপ্রিযাত্মজঃ।

মহাখড্গো মহাখেটো মহাসত্ত্বো মহাদ্যুতিঃ ॥ ১৯॥

মহর্ধিশ্চ মহামাযী মযূরবরবাহনঃ।

মযূরবর্হাতপত্রো মযূরনটনপ্রিযঃ ॥ ২০॥

মহানুভাবোঽমেযাত্মাঽমেযশ্রীশ্চ মহাপ্রভুঃ।

সুগুণো দুর্গুণদ্বেষী নির্গুণো নির্মলোঽমলঃ ॥ ২১॥

সুবলো বিমলঃ কান্তঃ কমলাসন পূজিতঃ।

কালঃ কমলপত্রাক্ষঃ কলিকল্মষনাশনঃ ॥ ২২॥

মহারণো মহাযোদ্ধা মহাযুদ্ধপ্রিযোঽভযঃ।

মহারথো মহাভাগো ভক্তাভীষ্টফলপ্রদঃ ॥ ২৩॥

ভক্তপ্রিযঃ প্রিযঃ প্রেম প্রেযান্ প্রীতিধরঃ সখা।

গৌরীকরসরোজাগ্র লালনীয মুখাম্বুজঃ ॥ ২৪॥

কৃত্তিকাস্তন্যপানৈকব্যগ্রষড্বদনাম্বুজঃ।

Stotram Digitalized By Sanskritdocuments.org

চন্দ্রচূডাঙ্গভূভাগ বিহারণবিশারদঃ ॥ ২৫॥

ঈশাননযনানন্দকন্দলাবণ্যনাসিকঃ ।

চন্দ্রচূডকরাম্ভোজ পরিমৃষ্টভুজাবলিঃ ॥ ২৬॥

লম্বোদর সহক্রীডা লম্পটঃ শরসম্ভবঃ ।

অমরাননালীক চকোরীপূর্ণ চন্দ্রমাঃ ॥ ২৭॥

সর্বাঙ্গ সুন্দরঃ শ্রীশঃ শ্রীকরঃ শ্রীপ্রদঃ শিবঃ ।

বল্লীসখো বনচরো বক্তা বাচস্পতির্বরঃ ॥ ২৮॥

চন্দ্রচূডো বর্হিপিঞ্ছ শেখরো মকুটোজ্জ্বলঃ ।

গুডাকেশঃ সুবৃত্তোরুশিরা মন্দারশেখরঃ ॥ ২৯॥

বিম্বাধরঃ কুন্দদন্তো জপাশোণাগ্রলোচনঃ ।

ষড্দর্শনীনটীরঙ্গরসনো মধুরস্বনঃ ॥ ৩০॥

মেঘগম্ভীরনির্ঘোষঃ প্রিযবাক্ প্রস্ফুটাক্ষরঃ ।

স্মিতবক্ত্রশ্চোৎপলাক্ষশ্চারুগম্ভীরবীক্ষণঃ ॥ ৩১॥

কর্ণান্তদীর্ঘনযনঃ কর্ণভূষণ ভূষিতঃ ।

সুকুণ্ডলশ্চারুগণ্ডঃ কম্বুগ্রীবো মহাহনুঃ ॥ ৩২॥

পীনাংসো গূঢজত্রুশ্চ পীনবৃত্তভুজাবলিঃ ।

রক্তাঙ্গো রত্নকেয়ূরো রত্নকঙ্কণভূষিতঃ॥ ৩৩॥

জ্যাকিণাঙ্ক লসদ্বামপ্রকোষ্ঠবলযোজ্জ্বলঃ ।

রেখাঙ্কুশধ্বজচ্ছত্রপাণিপদ্মো মহাযুধঃ ॥ ৩৪॥

সুরলোক ভযধ্বান্ত বালারুণকরোদযঃ ।

অঙ্গুলীযকরত্নাংশু দ্বিগুণোদ্যন্নখাঙ্কুরঃ ॥ ৩৫॥

পীনবক্ষা মহাহারো নবরত্নবিভূষণঃ ।

হিরণ্যগর্ভো হেমাঙ্গো হিরণ্যকবচো হরঃ ॥ ৩৬॥

হিরণ্ময শিরস্ত্রাণো হিরণ্যাক্ষো হিরণ্যদঃ ।

হিরণ্যনাভিস্ত্রিবলী ললিতোদরসুন্দরঃ ॥ ৩৭॥

সুবর্ণসূত্রবিলসদ্বিশঙ্কটকটীতটঃ ।

পীতাম্বরধরো রত্নমেখলাবৃত মধ্যকঃ ॥ ৩৮॥

পীবরালোমবৃত্তোদ্যৎসুজানুর্গুপ্তগুল্ফকঃ ।

শঙ্খচক্রাব্জকুলিশধ্বজরেখাঙ্ঘ্রিপঙ্কজঃ ॥ ৩৯॥

নবরত্নোজ্জ্বলৎপাদকটকঃ পরমাযুধঃ ।

সুরেন্দ্রমকুটপ্রোদ্যন্মণি রঞ্জিতপাদুকঃ ॥ ৪০॥

পূজ্যাঙ্ঘ্রিশ্চারুনখরো দেবসেব্যস্বপাদুকঃ ।

পার্বতীপাণি কমলপরিমৃষ্টপদাম্বুজঃ ॥ ৪১॥

মত্তমাতঙ্গ গমনো মান্যো মান্যগুণাকরঃ ।

ক্রৌঞ্চ দারণদক্ষৌজাঃ ক্ষণঃ ক্ষণবিভাগকৃত্ ॥ ৪২॥

সুগমো দুর্গমো দুর্গো দুরারোহোঽরিদুঃ সহঃ ।

সুভগঃ সুমুখঃ সূর্যঃ সূর্যমণ্ডলমধ্যগঃ ॥ ৪৩॥

স্বকিঙ্করোপসংসৃষ্টসৃষ্টিসংরক্ষিতাখিলঃ ।

জগৎস্রষ্টা জগদ্ভর্তা জগৎসংহারকারকঃ ॥ ৪৪॥

স্থাবরো জঙ্গমো জেতা বিজযো বিজযপ্রদঃ ।

জযশীলো জিতারাতির্জিতমাযো জিতাসুরঃ ॥ ৪৫॥

জিতকামো জিতক্রোধো জিতমোহস্সুমোহনঃ ।

কামদঃ কামভৃৎকামী কামরূপঃ কৃতাগমঃ ॥ ৪৬॥

কান্তঃ কল্যঃ কলিধ্বংসী কল্হারকুসুমপ্রিযঃ ।

রামো রমযিতা রম্যো রমণীজনবল্লভঃ ॥ ৪৭॥

রসজ্ঞো রসমূর্তিশ্চ রসো নবরসাত্মকঃ ।

রসাত্মা রসিকাত্মা চ রাসক্রীডাপরো রতিঃ ॥ ৪৮॥

সূর্যকোটিপ্রতীকাশঃ সোমসূর্যাগ্নিলোচনঃ ।

কলাভিজ্ঞঃ কলারূপী কলাপী সকলপ্রভুঃ ॥ ৪৯॥

বিন্দুর্নাদঃ কলামূর্তিঃ কলাতীতোঽক্ষরাত্মকঃ ।

মাত্রাকারঃ স্বরাকারঃ একমাত্রো দ্বিমাত্রকঃ ॥ ৫০॥

ত্রিমাত্রকশ্চতুর্মাত্রো ব্যক্তঃ সন্ধ্যক্ষরাত্মকঃ ।

ব্যঞ্জনাত্মা বিযুক্তাত্মা সংযুক্তাত্মা স্বরাত্মকঃ ॥ ৫১॥

বিসর্জনীয়োঽনুস্বারঃ সর্ববর্ণতনুর্মহান্ ।

অকারাত্মাঽপ্যুকারাত্মা মকারাত্মা ত্রিবর্ণকঃ ॥ ৫২॥

ওঙ্কারোঽথ বষট্কারঃ স্বাহাকারঃ স্বধাকৃতিঃ ।

আহুতির্হবনং হব্যং হোতাঽধ্বর্যুর্মহাহবিঃ ॥ ৫৩॥

ব্রহ্মোদ্গাতা সদস্যশ্চ বর্হিরিধ্মং সমিচ্চরুঃ ।

কব্যং পশুঃ পুরোডাশঃ আমিক্ষা বাজবাজিনম্ ॥ ৫৪॥

পবনঃ পাবনঃ পূতঃ পবমানঃ পরাকৃতিঃ ।

পবিত্রং পরিধিঃ পূর্ণপাত্রমুদ্ভূতিরিন্ধনম্ ॥ ৫৫॥

বিশোধনং পশুপতিঃ পশুপাশবিমোচকঃ ।

পাকযজ্ঞো মহাযজ্ঞো যজ্ঞো যজ্ঞপতির্যজুঃ ॥ ৫৬॥

যজ্ঞাঙ্গো যজ্ঞগম্যশ্চ যজ্বা যজ্ঞফলপ্রদঃ ।

যজ্ঞাঙ্গভূর্যজ্ঞপতির্যজ্ঞশ্রীর্যজ্ঞবাহনঃ ॥ ৫৭॥

যজ্ঞরাড্ যজ্ঞবিধ্বংসী যজ্ঞেশো যজ্ঞরক্ষকঃ ।

সহস্রবাহুঃ সর্বাত্মা সহস্রাক্ষঃ সহস্রপাত্ ॥ ৫৮॥

সহস্রবদনো নিত্যঃ সহস্রাত্মা বিরাট্ স্বরাট্ ।

সহস্রশীর্ষো বিশ্বশ্চ তৈজসঃ প্রাজ্ঞ আত্মবান্ ॥ ৫৯॥

অণুর্বৃহৎকৃশঃ স্থূলো দীর্ঘো হ্রস্বশ্চ বামনঃ ।

সূক্ষ্মঃ সূক্ষ্মতরোঽনন্তো বিশ্বরূপো নিরঞ্জনঃ ॥ ৬০॥

অমৃতেশোঽমৃতাহারোঽমৃতদাতাঽমৃতাঙ্গবান্ ।

অহোরূপস্ত্রিযামা চ সন্ধ্যারূপো দিনাত্মকঃ ॥ ৬১॥

অনিমেষো নিমেষাত্মা কলা কাষ্ঠা ক্ষণাত্মকঃ ।

মুহূর্তো ঘটিকারূপো যামো যামাত্মকস্তথা ॥ ৬২॥

পূর্বাহ্ণরূপো মধ্যাহ্নরূপঃ সায়াহ্নরূপকঃ ।
অপরাহ্ণোঽতিনিপুণঃ সবনাত্মা প্রজাগরঃ ॥ ৬৩॥

বেদ্যো বেদয়িতা বেদো বেদদৃষ্টো বিদাং বরঃ ।
বিনয়ো নয়নেতা চ বিদ্বজ্জনবহুপ্রিয়ঃ ॥ ৬৪ ॥

বিশ্বগোপ্তা বিশ্বভোক্তা বিশ্বকৃদ্বিশ্বভেষজম্ ।
বিশ্বম্ভরো বিশ্বপতির্বিশ্বরাড্বিশ্বমোহনঃ ॥ ৬৫॥

বিশ্বসাক্ষী বিশ্বহন্তা বীরো বিশ্বম্ভরাধিপঃ ।
বীরবাহুর্বীরহন্তা বীরাগ্র্যো বীরসৈনিকঃ ॥ ৬৬॥

বীরবাদপ্রিয়ঃ শূর একবীরঃ সুরাধিপঃ ।
শূরপদ্মাসুরদ্বেষী তারকাসুরভঞ্জনঃ ॥ ৬৭॥

তারাধিপস্তারহারঃ শূরহন্তাঽশ্ববাহনঃ ।
শরভঃ শরসম্ভূতঃ শক্তঃ শরবণেশয়ঃ ॥ ৬৮॥

শাঙ্করিঃ শাম্ভবঃ শম্ভুঃ সাধুঃ সাধুজনপ্রিয়ঃ ।
সারাঙ্গঃ সারকঃ সর্বঃ শার্বঃ শার্বজনপ্রিয়ঃ ॥ ৬৯॥

গঙ্গাসুতোঽতিগম্ভীরো গম্ভীরহৃদয়োঽনঘঃ ।

অমোঘবিক্রমশ্চক্রশ্চক্রভূঃ শক্রপূজিতঃ ॥ ৭০॥

চক্রপাণিশ্চক্রপতিশ্চক্রবালান্তভূপতিঃ ।
সার্বভৌমস্সুরপতিঃ সর্বলোকাধিরক্ষকঃ ॥ ৭১॥

সাধুপঃ সত্যসঙ্কল্পঃ সত্যস্সত্যবতাং বরঃ ।
সত্যপ্রিযঃ সত্যগতিঃ সত্যলোকজনপ্রিযঃ ॥ ৭২॥

ভূতভব্য ভবদ্রূপো ভূতভব্যভবৎপ্রভুঃ ।
ভূতাদির্ভূতমধ্যস্থো ভূতবিধ্বংসকারকঃ ॥ ৭৩॥

ভূতপ্রতিষ্ঠাসঙ্কর্তা ভূতাধিষ্ঠানমব্যযঃ ।
ওজোনিধির্গুণনিধিস্তেজোরাশিরকল্মষঃ ॥ ৭৪॥

কল্মষঘ্নঃ কলিধ্বংসী কলৌ বরদবিগ্রহঃ ।
কল্যাণমূর্তিঃ কামাত্মা কামক্রোধবিবর্জিতঃ ॥ ৭৫॥

গোপ্তা গোপাযিতা গুপ্তির্গুণাতীতো গুণাশ্রযঃ ।
সত্বমূর্তী রজোমূর্তিস্তমোমূর্তিশ্চিদাত্মকঃ ॥ ৭৬॥

দেবসেনাপতির্ভূমা মহিমা মহিমাকরঃ ।
প্রকাশরূপঃ পাপঘ্নঃ পবনঃ পাবনোঽনলঃ ॥ ৭৭॥

কৈলাসনিলয়ঃ কান্তঃ কনকাচল কার্মুকঃ।

নির্ধূতো দেবভূতিশ্চ ব্যাকৃতিঃ ক্রতুরক্ষকঃ ॥ ৭৮॥

উপেন্দ্র ইন্দ্রবন্দ্যাঙ্ঘ্রিরুরুজঙ্ঘ উরুক্রমঃ।

বিক্রান্তো বিজয়ক্রান্তো বিবেকবিনয়প্রদঃ ॥ ৭৯॥

অবিনীতজনধ্বংসী সর্বাবগুণবর্জিতঃ।

কুলশৈলৈকনিলয়ো বল্লীবাঞ্ছিতবিভ্রমঃ ॥ ৮০॥

শাম্ভবঃ শম্ভুতনয়ঃ শঙ্করাঙ্গবিভূষণঃ।

স্বয়ম্ভূঃ স্ববশঃ স্বস্থঃ পুষ্করাক্ষঃ পুরূদ্ভবঃ ॥ ৮১॥

মনুর্মানবগোপ্তা চ স্থবিষ্ঠঃ স্থবিরো যুবা।

বালঃ শিশুর্নিত্যযুবা নিত্যকৌমারবান্ মহান্ ॥ ৮২॥

অগ্রাহ্যরূপো গ্রাহ্যশ্চ সুগ্রহঃ সুন্দরাকৃতিঃ।

প্রমর্দনঃ প্রভূতশ্রীর্লোহিতাক্ষোঽরিমর্দনঃ ॥ ৮৩॥

ত্রিধামা ত্রিককুপ্ত্রিশ্রীঃ ত্রিলোকনিলয়োঽলয়ঃ।

শর্মদঃ শর্মবান্ শর্ম শরণ্যঃ শরণালয়ঃ ॥ ৮৪॥

স্থাণুঃ স্থিরতরঃ স্থেয়ান্ স্থিরশ্রীঃ স্থিরবিক্রমঃ।

স্থিরপ্রতিজ্ঞঃ স্থিরধীর্বিশ্বরেতাঃ প্রজাভবঃ ॥ ৮৫॥

অত্যযঃ প্রত্যযঃ শ্রেষ্ঠঃ সর্বযোগবিনিঃসৃতঃ ।
সর্বযোগেশ্বরঃ সিদ্ধঃ সর্বজ্ঞঃ সর্বদর্শনঃ ॥ ৮৬॥

বসুর্বসুমনা দেবো বসুরেতা বসুপ্রদঃ ।
সমাত্মা সমদর্শী চ সমদঃ সর্বদর্শনঃ ॥ ৮৭॥

বৃষাকৃতির্বৃষারূঢো বৃষকর্মা বৃষপ্রিযঃ ।
শুচিঃ শুচিমনাঃ শুদ্ধঃ শুদ্ধকীর্তিঃ শুচিশ্রবাঃ ॥ ৮৮॥

রৌদ্রকর্মা মহারৌদ্রো রুদ্রাত্মা রুদ্রসম্ভবঃ ।
অনেকমূর্তির্বিশ্বাত্মাঽনেকবাহুররিন্দমঃ ॥ ৮৯॥

বীরবাহুর্বিশ্বসেনো বিনেযো বিনযপ্রদঃ । vinayo??
সর্বগঃ সর্ববিৎসর্বঃ সর্ববেদান্তগোচরঃ ॥ ৯০॥

কবিঃ পুরাণোঽনুশাস্তা স্থূলস্থূল অণোরণুঃ ।
ভ্রাজিষ্ণুর্বিষ্ণু বিনুতঃ কৃষ্ণকেশঃ কিশোরকঃ ॥ ৯১॥

ভোজনং ভাজনং ভোক্তা বিশ্বভোক্তা বিশাং পতিঃ ।
বিশ্বযোনির্বিশালাক্ষো বিরাগো বীরসেবিতঃ ॥ ৯২॥

পুণ্যঃ পুরুযশাঃ পূজ্যঃ পূতকীর্তিঃ পুনর্বসুঃ ।

সুরেন্দ্রঃ সর্বলোকেন্দ্রো মহেন্দ্রোপেন্দ্রবন্দিতঃ ॥ ৯৩॥

বিশ্ববেদ্যো বিশ্বপতির্বিশ্বভৃদ্বিশ্বভেষজম্ ।

মধুর্মধুরসঙ্গীতো মাধবঃ শুচিরূষ্মলঃ ॥ ৯৪॥

শুক্রঃ শুভ্রগুণঃ শুক্লঃ শোকহন্তা শুচিস্মিতঃ ।

মহেষ্বাসো বিষ্ণুপতিঃ মহীহন্তা মহীপতিঃ ॥ ৯৫॥

মরীচির্মদনো মানী মাতঙ্গগতিরদ্ভুতঃ ।

হংসঃ সুপূর্ণঃ সুমনাঃ ভুজঙ্গেশভুজাবলিঃ ॥ ৯৬॥

পদ্মনাভঃ পশুপতিঃ পারজ্ঞো বেদপারগঃ ।

পণ্ডিতঃ পরঘাতী চ সন্ধাতা সন্ধিমান্ সমঃ ॥ ৯৭॥

দুর্মর্ষণো দুষ্টশাস্তা দুর্ধর্ষো যুদ্ধধর্ষণঃ ।

বিখ্যাতাত্মা বিধেযাত্মা বিশ্বপ্রখ্যাতবিক্রমঃ ॥ ৯৮॥

সন্মার্গদেশিকো মার্গরক্ষকো মার্গদাযকঃ ।

অনিরুদ্ধোঽনিরুদ্ধশ্রীরাদিত্যো দৈত্যমর্দনঃ ॥ ৯৯॥

অনিমেষোঽনিমেষার্চ্যস্ত্রিজগদ্গ্রামণীর্গুণী ।

সম্পৃক্তঃ সম্প্রবৃত্তাত্মা নিবৃত্তাত্মাঽঽত্মবিত্তমঃ ॥ ১০০॥

অর্চিষ্মানর্চনপ্রীতঃ পাশভৃৎপাবকো মরুত্ ।

সোমঃ সৌম্যঃ সোমসুতঃ সোমসুৎসোমভূষণঃ ॥ ১০১॥

সর্বসামপ্রিযঃ সর্বসমঃ সর্বংসহো বসুঃ ।

উমাসূনুরুমাভক্ত উৎফুল্লমুখপঙ্কজঃ ॥ ১০২॥

অমৃত্যুরমরারাতিমৃত্যুর্মৃত্যুঞ্জযোঽজিতঃ ।

মন্দারকুসুমাপীডো মদনান্তকবল্লভঃ ॥ ১০৩॥

মাল্যবন্মদনাকারো মালতীকুসুমপ্রিযঃ ।

সুপ্রসাদঃ সুরারাধ্যঃ সুমুখঃ সুমহাযশাঃ ॥ ১০৪॥

বৃষপর্বা বিরূপাক্ষো বিষ্বক্সেনো বৃষোদরঃ ।

মুক্তো মুক্তগতির্মোক্ষো মুকুন্দো মুদ্গলী মুনিঃ ॥ ১০৫॥

শ্রুতবান্ সুশ্রুতঃ শ্রোতা শ্রুতিগম্যঃ শ্রুতিস্তুতঃ ।

বর্ধমানো বনরতির্বানপ্রস্থনিষেবিতঃ ॥ ১০৬॥

বাগ্মী বরো বাবদূকো বসুদেববরপ্রদঃ ।

মহেশ্বরো মযূরস্থঃ শক্তিহস্তস্ত্রিশূলধৃত্ ॥ ১০৭॥

ওজস্তেজশ্চ তেজস্বী প্রতাপঃ সুপ্রতাপবান্ ।

ঋদ্ধিঃ সমৃদ্ধিঃ সংসিদ্ধিঃ সুসিদ্ধিঃ সিদ্ধসেবিতঃ ॥ ১০৮॥

অমৃতাশোঽমৃতবপুরমৃতোঽমৃতদায়কঃ ।

চন্দ্রমাশ্চন্দ্রবদনশ্চন্দ্রদৃক্ চন্দ্রশীতলঃ ॥ ১০৯॥

মতিমান্নীতিমান্নীতিঃ কীর্তিমান্কীর্তিবর্ধনঃ ।

ঔষধং চৌষধীনাথঃ প্রদীপো ভবমোচনঃ ॥ ১১০॥

ভাস্করো ভাস্করতনুর্ভানুর্ভয়বিনাশনঃ ।

চতুর্যুগব্যবস্থাতা যুগধর্মপ্রবর্তকঃ ॥ ১১১॥

অযুজো মিথুনং যোগো যোগজ্ঞো যোগপারগঃ ।

মহাশনো মহাভূতো মহাপুরুষবিক্রমঃ ॥ ১১২॥

যুগান্তকৃদ্যুগাবর্তো দৃশ্যাদৃশ্যস্বরূপকঃ ।

সহস্রজিন্মহামূর্তিঃ সহস্রাযুধপণ্ডিতঃ ॥ ১১৩॥

অনন্তাসুরসংহর্তা সুপ্রতিষ্ঠঃ সুখাকরঃ ।

অক্রোধনঃ ক্রোধহন্তা শত্রুক্রোধবিমর্দনঃ ॥ ১১৪॥

বিশ্বমূর্তির্বিশ্ববাহুর্বিশ্বদৃগ্বিশ্বতো মুখঃ ।

বিশ্বেশো বিশ্বসংসেব্যো দ্যাবাভূমিবিবর্ধনঃ ॥ ১১৫॥

অপান্নিধিরকর্তাঽন্নমন্নদাতাঽন্নদারুণঃ ।

অম্ভোজমৌলিরুজ্জীবঃ প্রাণঃ প্রাণপ্রদায়কঃ ॥ ১১৬॥

স্কন্দঃ স্কন্দধরো ধুর্যো ধার্যো ধৃতিরনাতুরঃ ।

আতুরৌষধিরব্যগ্রো বৈদ্যনাথোঽগদঙ্করঃ ॥ ১১৭॥

দেবদেবো বৃহদ্ভানুঃ স্বর্ভানুঃ পদ্মবল্লভঃ ।

অকুলঃ কুলনেতা চ কুলস্রষ্টা কুলেশ্বরঃ ।১১৮॥

নিধির্নিধিপ্রিয়ঃ শঙ্খপদ্মাদিনিধিসেবিতঃ ।

শতানন্দঃ শতাবর্তঃ শতমূর্তিঃ শতায়ুধঃ ॥ ১১৯॥

পদ্মাসনঃ পদ্মনেত্রঃ পদ্মাঙ্ঘ্রিঃ পদ্মপাণিকঃ ।

ঈশঃ কারণকার্যাত্মা সূক্ষ্মাত্মা স্থূলমূর্তিমান্ ॥ ১২০॥

অশরীরী ত্রিশরীরী শরীরত্রয়নায়কঃ ।

জাগ্রৎপ্রপঞ্চাধিপতিঃ স্বপ্নলোকাভিমানবান্ ॥ ১২১॥

সুষুপ্ত্যবস্থাভিমানী সর্বসাক্ষী তুরীয়গঃ ।

স্বাপনঃ স্ববশো ব্যাপী বিশ্বমূর্তির্বিরোচনঃ ॥ ১২২॥

বীরসেনো বীরবেষো বীরাযুধসমাবৃতঃ ।

সর্বলক্ষণলক্ষণ্যো লক্ষ্মীবান্ শুভলক্ষণঃ ॥ ১২৩॥

সমযজ্ঞঃ সুসময সমাধিজনবল্লভঃ ।

অতুলোঽতুল্যমহিমা শরভোপমবিক্রমঃ ॥ ১২৪ ॥

অহেতুর্হেতুমান্হেতুঃ হেতুহেতুমদাশ্রযঃ ।

বিক্ষরো রোহিতো রক্তো বিরক্তো বিজনপ্রিযঃ ॥ ১২৫॥

মহীধরো মাতরিশ্বা মাঙ্গল্যমকরালযঃ ।

মধ্যমান্তাদিরক্ষোভ্যো রক্ষোবিক্ষোভকারকঃ ॥ ১২৬॥

গুহো গুহাশযো গোপ্তা গুহ্যো গুণমহার্ণবঃ ।

নিরুদ্যোগো মহোদ্যোগী নির্নিরোধো নিরঙ্কুশঃ॥ ১২৭॥

মহাবেগো মহাপ্রাণো মহেশ্বরমনোহরঃ ।

অমৃতাশোঽমিতাহারো মিতভাষ্যমিতার্থবাক্ ॥ ১২৮॥

অক্ষোভ্যঃ ক্ষোভকৃৎক্ষেমঃ ক্ষেমবান্ ক্ষেমবর্ধনঃ ।

ঋদ্ধ ঋদ্ধিপ্রদো মত্তো মত্তকেকিনিষূদনঃ ॥ ১২৯॥

ধর্মো ধর্মবিদাং শ্রেষ্ঠো বৈকুণ্ঠো বাসবপ্রিযঃ ।

পরধীরোঽপরাক্রান্ত পরিতুষ্টঃ পরাসুহৃত্ ॥ ১৩০॥

রামো রামনুতো রম্যো রমাপতিনুতো হিতঃ ।
বিরামো বিনতো বিদ্বান্ বীরভদ্রো বিধিপ্রিয়ঃ ॥ ১৩১॥

বিনযো বিনযপ্রীতো বিমতোরুমদাপহঃ ।
সর্বশক্তিমতাং শ্রেষ্ঠঃ সর্বদৈত্যভযঙ্করঃ ॥ ১৩২॥

শত্রুঘ্নঃশত্রুবিনতঃ শত্রুসঙ্ঘপ্রধর্ষকঃ ।
সুদর্শন ঋতুপতির্বসন্তো মাধবো মধুঃ ॥ ১৩৩॥

বসন্তকেলিনিরতো বনকেলিবিশারদঃ ।
পুষ্পধূলীপরিবৃতো নবপল্লবশেখরঃ ॥ ১৩৪॥

জলকেলিপরো জন্যো জহ্নুকন্যোপলালিতঃ ।
গাঙ্গেযো গীতকুশলো গঙ্গাপূরবিহারবান্ ॥ ১৩৫॥

গঙ্গাধরো গণপতির্গণনাথসমাবৃতঃ ।
বিশ্রামো বিশ্রমযুতো বিশ্বভুগ্বিশ্বদক্ষিণঃ ॥ ১৩৬॥

বিস্তারো বিগ্রহো ব্যাসো বিশ্বরক্ষণ তৎপরঃ ।
বিনতানন্দ কারী চ পার্বতীপ্রাণনন্দনঃ ॥

বিশাখঃ ষণ্মুখঃ কার্তিকেযঃ কামপ্রদাযকঃ ॥ ১৩৭॥

ইতি শ্রীসুব্রহ্মণ্যসহস্রনামস্তোত্রং সম্পূর্ণম্ ।

। ॐ শরবণভব ॐ ।

From shrIsubrahamNyastutima~njarI published by Shri MahaperiyavAl Trust.

We are thankful for the quality religious publications by the trust

and providing for everyone's use.

Encoded by Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by Sivakumar, NA

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Subrahmanya Sahasranama Stotram ( By Markandeya Rishi ) Lyrics in Bengali PDF
% File name : subrahmaNyasahasranAmastotra.itx
% Category : sahasranAma
% Location : doc_subrahmanya
% Language : Sanskrit
% Subject : hinduism/religion Mahaperiyavaal Trust. We are thankful for the quality religious publications by the trust and providing for everyone''s use.
% Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com
% Proofread by : Sivakumar Thyagarajan shivakumar24 at gmail.com
% Description-comments : From shrIsubrahamNyastutimanjarI published by Shri
% Latest update : August 24, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study

% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 8, 2015 ] at Stotram Website